শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ দ্ব্যধিকশততমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ দ্ব্যধিকশততমঃ সর্গঃ ॥

## ভরতেন ভূযঃ শ্রীরামং প্রতি রাজ্যগ্রহণাযানুরোধং কৃৎৱা তস্মৈ পিতৃনিধনসমাচারস্য নিৱেদনম্

রামস্য ৱচনং শ্রুৎৱা ভরতঃ প্রত্যুৱাচ হ।
কিং মে ধর্মাদ্ ৱিহীনস্য রাজধর্মঃ করিষ্যতি॥ **2.102.1** ॥

শাশ্ৱতোঽযং সদা ধর্মঃ স্থিতোঽস্মাসু নরর্ষভ।
জ্যেষ্ঠে পুত্রে স্থিতে রাজা ন কনীযান্ ভৱেন্নৃপঃ॥ **2.102.2** ॥

স সমৃদ্ধাং মযা সার্ধমযোধ্যাং গচ্ছ রাঘৱ।
অভিষেচয চাত্মানং কুলস্যাস্য ভৱায নঃ॥ **2.102.3** ॥

রাজানং মানুষং প্রাহুর্দেৱৎৱে সম্মতো মম।
যস্য ধর্মার্থসহিতং ৱৃত্তমাহুরমানুষম্॥ **2.102.4** ॥

কেকযস্থে চ মযি তু ৎৱযি চারণ্যমাশ্রিতে।
ধীমান্ স্ৱর্গং গতো রাজা যাযজূকঃ সতাং মতঃ॥ **2.102.5** ॥

নিষ্ক্রান্তমাত্রে ভৱতি সহসীতে সলক্ষ্মণে।
দুঃখশোকাভিভূতস্তু রাজা ত্রিদিৱমভ্যগাৎ॥ **2.102.6** ॥

উত্তিষ্ঠ পুরুষৱ্যাঘ্র ক্রিযতামুদকং পিতুঃ।
অহং চাযং চ শত্রুঘ্নঃ পূর্ৱমেৱ কৃতোদকৌ॥ **2.102.7** ॥

প্রিযেণ কিল দত্তং হি পিতৃলোকেষু রাঘৱ।
অক্ষযং ভৱতীত্যাহুর্ভৱাংশ্চৈৱ পিতুঃ প্রিযঃ॥ **2.102.8**॥

ৎৱামেৱ শোচংস্তৱ দর্শনেপ্সু -
স্ত্বয্যেৱ সক্তামনিৱর্ত্য বুদ্ধিম্।
ৎৱযা ৱিহীনস্তৱ শোকরুগ্ণ -
স্ত্বাং সংস্মরন্নেৱ গতঃ পিতা তে॥ **2.102.9**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
অযোধ্যাকাণ্ডে দ্ব্যধিকশততমঃ সর্গঃ ॥